॥ श्रीः ॥

हरिदास-संस्कृत-ग्रन्थमाला

३२

ज्योतिःशास्त्रान्तर्गतः

प्रश्नाङ्कचूडामणिः

ध्वजादिप्रश्नगणना च

सम्पादकः—

पं० श्रीसीतारामझा ज्यौतिषाचार्यः

(द्वितीयं संस्करणम्)

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

मूल्य ०-२५] (सर्वेऽधिकाराः प्रकाशकाधीनाः) [ई० १९६२

विषय-सूची

विषयाः		पृष्ठाङ्काः
अक्षराङ्काः	...	१
ध्रुवाङ्काः फलानि च	...	२
अस्तिनास्तिप्रश्नः	...	३
लाभालाभप्रश्नः	...	३
कुशलाकुशलप्रश्नः	...	४
नष्टलाभालाभप्रश्नः	...	४
दिग्ज्ञानम्	...	४
जातिज्ञानम्	...	४
नष्टस्थाननिर्णयप्रश्नः	...	४
दानादिप्रश्नः	...	५
देवपूजाप्रश्नः	...	५
प्रवासिचरस्थिरप्रश्नः	...	५
गमनप्रश्नः	...	५
कालप्रश्नः	...	६
मुष्टिवस्तुज्ञानप्रश्नः	...	६
धातुज्ञानम्	...	६
भूषणादिज्ञानम्	...	७
पुत्रकन्यादिज्ञानप्रश्नः	...	७

विषयाः		पृष्ठाङ्काः
आयुर्बलप्रश्नः	...	७
धातुमूलजीवप्रश्नः	...	७
सक्विप्रश्नः	...	८
गमनागमनप्रश्नः	...	८
सत्यमिथ्याप्रश्नः	...	८
वृष्टिप्रश्नः	...	८
दिनावधिप्रश्नः	...	८
व्यवहारप्रश्नः	...	९
नौकाप्रश्नः	...	९
वाणिज्यप्रश्नः	...	९
अधिकारप्राप्तिप्रश्नः	...	९
ग्रामप्राप्तिप्रश्नः	...	९
कार्यसिद्धिप्रश्नः	...	९
बन्दिमोचनप्रश्नः	...	१०
कालनिर्णयः	...	१०

॥ श्रीः ॥

प्रश्नाङ्कचूडामणिः

पूर्वाह्णे ग्राहयेत् प्रश्ने पुष्पस्य शिशुनाभिधाम् ।
यूना फलस्य मध्याह्ने देवस्यातो जरा मता ॥
तत्र वस्तुस्वराङ्कानां पिण्डं ध्रुवकमिश्रितम् ।
भाजयित्वा त्रिभिर्वाच्यं फलं शेषानुसारतः ॥

अथाक्षराङ्काः

गुणेन्दवो १३ऽवनिकरौ २१कृशानुशशिनौ १३ धृतिः १८ ।
तिथयो १५ बाहुयमला २२ नन्दचन्द्रा १९ द्विबाहवः २२ ।
अङ्केन्दवो१९ऽब्धिगुणा ३१ भानवो १२ द्विरदेन्दवः १८ ।
स्वराणां क्लीबहीनानां निर्दिष्टाः पिण्डका इमे ॥
रूपनेत्राणि २१ खगुणा ३० विश्वे १३ मङ्गलभूमयः १८ ।
शशाङ्करामा३१भान्य२७ष्टि१६रिषुरामा३५धृति१८र्नखाः २० ॥
अब्दाः १७ शराग्नयो ३५ विश्वे १३ वज्रिणः १४ पर्वतेन्दवः१७ ।
घना १७ नागभुवो १७ बाणवह्नयो ३५ द्विरदाश्विनः २८ ॥
गजचन्द्रा १८ ऋतुगुणा ३६ रूपदस्रा २१ धराश्विनः २१ ।
नखरा२०स्तिथयो १५ विश्वे १७रुद्रा११नन्दाः९कुबाहवः २१ ॥
शररामा ३५ घना १७ बाणवह्नयो ३५ ऽर्काश्च १२ वज्रिणः१४ ।
कादीनामित्यङ्कपिण्डाः क्षान्तानामीरिताः क्रमात् ॥

अथ ध्रुवाङ्काः फलानि च

लाभालाभगतप्रश्ने खाब्धयो ४० ध्रुवकः स्मृतः ।
लाभोऽल्पलाभोऽप्यभयः फलमत्र क्रमान्वितम् ॥
जीवनाजीवनप्रश्ने गगनाब्धि४० र्ध्रुवः स्मृतः ।
क्रमेण जीवनं कष्टं मृतिश्च त्रिफलं स्मृतम् ॥
सुखदुःखात्मकप्रश्ने ध्रुवा मङ्गलभूमयः १८ ।
सुखं मिश्रं महत्कष्टं फलमत्र क्रमान्वितम् ॥
आगमागमनप्रश्ने गजरामा ३८ ध्रुवो भवेत् ।
अनुक्रमात् फलान्यत्र आगमस्थित्यनागमाः ॥
चत्वारिंशद् ध्रुवः ४० प्रोक्तः प्रश्ने जयपराजये ।
जयः सन्धिश्च भङ्गश्च क्रमेणात्र फलान्यपि ॥
गमनागमनप्रश्ने ध्रुवः स्याद् गगनाग्नयः ३० ।
गमनागमनाभावो मरणञ्च क्रमात् फलम् ॥
वर्षावर्षात्मकप्रश्ने ध्रुवकः स्याद् द्विपावकाः ३२ ।
वर्षाल्पवृष्ट्यनावृष्टिः फलमत्र क्रमाद्विदुः ।
इत्येते ध्रुवकाः प्रोक्ताः फलानि च यथाक्रमम् ।
एषामेवानुसारेण शेषमूह्यं विचक्षणैः ॥

इति प्रश्नाङ्कचूडामणिः समाप्तः ।

अथ ध्वजादिप्रश्नगणना

ॐ नमः शिवाय। अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ध्वजः सूर्य्यः।१।क ख ग घ ङ धूम्रः भौमः।२। च छ ज झ ञ सिंहः शुक्रः।३। ट ठ ड ढ ण श्वा बुधः।४। त थ द ध न वृषो गुरुः।५। प फ ब भ म खरः शनिः।६। य र ल व गजश्चन्द्रः।७। श ष स ह ध्वाङ्क्षः।८।

अ क च ट त प य श फलोद्देशे प्रश्नः भूतभविष्यद्-वर्त्तमानज्ञानज्योतिषं कृतम्। उच्चारितफलनाम स्वकृत्वा अकारादिवर्गं कृत्वा ध्वजादौ या भवन्ति आयः कल्पनीयः अतस्तस्य फलं वदेत्।

ध्वजो धूम्रस्तथा सिंहः स्वान वृषश्च खरो गजः।
ध्वांक्षस्तथाष्टमो ज्ञेयः शुभाशुभफलं वदेत्॥

तत्रादौ अस्तिनास्तिप्रश्नः

ध्वजे कुञ्जरसिंहे च वृषे नास्तीति निश्चितम्।
धूम्रे शुनि खरे ध्वाङ्क्षे चाऽस्ति प्रश्नस्य लक्षणम्॥ १॥

अथ लाभालाभप्रश्नः

ध्वजे गजे वृषे सिंहे शीघ्रलाभो भवेद् ध्रुवम्।
धूम्रे शुनि खरे ध्वाङ्क्षे चास्ति लाभो विनिर्दिशेत्॥ २॥

कुशलाकुशलप्रश्नः

सिंहे वृषे ध्वजे गजे प्रवासिकुशलप्रदम् ।
ध्वाङ्क्षे शुनि खरे धूम्रे नास्तीति कुशलं वदेत् ॥ ३ ॥

अथ नष्टलाभालाभप्रश्नः

ध्वजे गजे वृषे सिंहे गतलाभः सुनिश्चितः ।
ध्वांक्षे शुनि खरे धूम्रे नष्टहानिं विदुर्बुधाः ॥ ४ ॥

अथ दिग्ज्ञानम्

ध्वजे पूर्वगतश्चैव धूम्रेऽग्निदिशिगं तथा ।
सिंहे च दक्षिणे चैव नैर्ऋत्यां च तथा शुनि ॥
पश्चिमे वृषभे ज्ञेयं वायव्ये च खरे तथा ॥
उत्तरे कुञ्जरे ज्ञेयं ऐशान्यां ध्याङ्क्षके तथा ॥ ५ ॥

अथ जातिज्ञानम्

ध्वजे च ब्राह्मणश्चैव धूम्रे क्षत्रिय एव च ।
सिंहे वैश्यश्च विज्ञेयः शुनि शूद्रस्तथैव च ॥
वृषेऽध्यापको विज्ञेयः खरे चौरस्तु सेवकः ।
गजे दासी च विज्ञेया ध्वाङ्क्षे रजकनापितौ ॥ ६ ॥

अथ नष्टस्थाननिर्णयप्रश्नः

विवरे च ध्वजे नष्टे धूम्रे अग्निगृहे तथा ।
तथा सिंहे अरण्ये च शुनि स्थानान्तरेऽपि च ॥

वृषे भाण्डगतश्चैव खरे काष्ठशिलातले ।
गजे नष्टगृहे चैव ध्वाङ्क्षे भूषणवेश्मनि ॥ ७ ॥

अथ दानादिप्रश्नः

गोधूमश्च ध्वजे दद्यात् धूम्रे चैत्र तिलप्रदम् ।
पीतवस्त्रश्च सिंहे च शुनि चैव च धान्यकम् ॥
वृषे च तण्डुलं प्रोक्तं खरे च चणकन्तथा ।
गजे गुडघृतं देयं ध्वाङ्क्षे स्वर्णं विनिर्दिशेत् ॥ ८ ॥

अथ देवपूजाप्रश्नः

ध्वजे भैरवपूजा स्यात् धूम्रे च जगदम्बिकाम् ।
सिंहे च सूर्य्यभक्तिश्च शुनि वायुसुते तथा ॥
वृषे रुद्रं विजानीयात् खरे वागीश्वरीन्तथा ।
गणेशश्च गजे चैव ध्वाङ्क्षे च पितृपूजनम् ॥ ९ ॥

अथ प्रवासिचरस्थिरप्रश्नः

ध्वजे गजे स्थिरश्चैव शुनि सिंहे च चञ्चलम् ।
वृषे धूम्रे प्रयाणस्थं खरे ध्वाङ्क्षे च काष्ठगम् ॥ १० ॥

अथ गमनप्रश्नः

ध्वजे धूम्रे समीपस्थं दूरस्थं गजसिंहयोः ।
वृषे खरे च मार्गस्थं ध्वाङ्क्षे शुनि पुनर्गमः ॥ ११ ॥

अथ कालप्रश्नः

ध्वजे पक्षमिदं प्रोक्तं धूम्रे सप्तदिनं तथा ।
एकविंशतिः सिंहे च शुनि मासं तथैव च ॥
वृषे च सार्द्धमासं स्यात् खरे मासद्वयं तथा ।
गजे मासत्रयं प्रोक्तं ध्वाङ्क्षे च अयनं स्मृतम् ॥ १२ ॥

अथ मुष्टिवस्तुज्ञानप्रश्नः

कुसुमश्च ध्वजे ज्ञेयं धूम्रे श्वेतं तथैव च ।
लोहितं गजसिंहे च शुनि च पाण्डुनीलकम् ॥
पीतवर्णं वृषे ज्ञेयं खरे च धूम्रवर्णकम् ।
गजे च श्यामवर्णश्च ध्वाङ्क्षे च मिश्रवर्णकम् ॥ १३ ॥

अथ मुष्टिवस्तुज्ञानप्रश्नः

ध्वजे पत्रश्च विज्ञेयं धूम्रे पुष्पं विशेषतः ।
सिंहे फलश्च विज्ञेयं शुनि काष्ठादिसम्भवम् ॥
वृषे धान्यं तथा प्रोक्तं खरे तृणं निगद्यते ॥
गजे जीवनं विज्ञेयं ध्वाङ्क्षे तृणं तथा स्मृतम् ॥ १४ ॥

अथ धातुज्ञानम्

ध्वजे सुवर्णकं ज्ञेयं धूम्रे रौप्यं तथैव च ।
सिंहे ताम्रश्च विज्ञेयं शुनि लौहं विदुर्बुधाः ॥

वृषे कांस्यं खरे नागं कपिलश्च गजे भवेत् ।
ध्वाङ्क्षे च पित्तलं ज्ञेयं कथितं पूर्वपण्डितैः ॥ १५ ॥

अथ भूषणादिज्ञानम्

ध्वजे च भूषणं मूर्ध्नि धूम्रके मुखभूषणम् ।
कण्ठभूषणं सिंहे च शुनि च हृदयं तथा ॥
वृषे हस्तादिविज्ञेयं अङ्गुलीभूषणं खरे ।
गजे च कटिसूत्रश्च ध्वाङ्क्षे पादादिकं तथा ॥ १६ ॥

अथ पुत्रकन्यादिज्ञानप्रश्नः

ध्वजे गजे वृषे सिंहे गुर्विणी पुत्रमादिशेत् ।
धूम्रे श्वाने खरे ध्वांक्षे कन्याजन्मविनिर्दिशेत् ॥ १७ ॥

अथ आयुर्बलप्रश्नः

ध्वजे सिंहे षडप्रोक्तं गजे सोमसुतस्तथा ।
वृषे च षष्टिवर्षाणि खरे व्योमाब्धिसंज्ञकम् ॥
शुनि च विंशतिः प्रोक्ता ध्वाङ्क्षे षोडशभिस्तथा ।
धूम्रे वर्षमितं प्रोक्तमायुःप्रश्नं विनिर्दिशेत् ॥ १८ ॥

अथ धातुमूलजीवप्रश्नः

ध्वजे धूम्रे च धातूनां गजे सिंहे च मूलकम् ।
खरे शुनि वृषे ध्वाङ्क्षे जीवचिन्ता भवेद् ध्रुवम् ॥ १९ ॥

अथ सन्धिप्रश्नः

विपरीतौ च सन्धिः स्यादथ प्रोक्तं मनीषिभिः ।
गढं कोटं तथा दुर्गं गृहादि च विचिन्तयेत् ॥ २० ॥

अथ गमनागमनप्रश्नः

गजे वृषे ध्वजे सिंहे शत्रूणां शीघ्रमागमः ।
खरे शुनि तथा धूम्रे ध्वाङ्क्षे च नास्ति चादिशेत् ॥ २१ ॥

अथ सत्यमिथ्याप्रश्नः

ध्वजे सिंहे वृषे गजे सत्यवाक्यं विनिर्दिशेत् ।
धूम्रे शुनि खरे ध्वाङ्क्षे मिथ्या वदति निश्चितम् ॥ २२ ॥

अथ वृष्टिप्रश्नः

वृषे शुनि गजे धूम्रे वृष्टिर्भवति सत्वरम् ।
सिंहे ध्वजे खरे ध्वाङ्क्षे नास्ति वृष्टिर्विनिर्दिशेत् ॥ २३ ॥

अथ दिनावधिप्रश्नः

धूम्रे सप्तदिनं प्रोक्तं वृषे दिनं तथैव च ।
शुनि विंशतिर्ध्वाङ्क्षे स्याद् ध्वजे च सप्तविंशतिः ॥
सिंहे वृषे च व्योमाब्धिः खरे ध्वांक्षे ऋतुं वदेत् ।
एवं प्रश्नं विनिर्ज्ञेयं कथितं गणकोत्तमैः ॥ २४ ॥

अथ व्यवहारप्रश्नः

ध्वजे गजे वृषे सिंहे व्यवहारं शुभप्रदम् ।
ध्वांक्षे शुनि खरे धूम्रे कलहमशुभप्रदम् ॥ २५ ॥

अथ नौकाप्रश्नः

ध्वजे गजे च सिंहे च वृषे च कुशलप्रदम् ।
ध्वांक्षे शुनि खरे धूम्रे नौकायात्रा न सिद्ध्यति ॥ २६ ॥

अथ वाणिज्यप्राप्तिप्रश्नः

ध्वजे गजे ऋणप्राप्तिर्वृषे सिंहे च सिद्धता ।
खरे शुनि तथा प्राप्तिः शत्रुं गृह्णाति सत्वरम् ॥
ध्वाङ्क्षे धूम्रे च नास्ति च कलहं भ्रातृभिः सह ॥ २७ ॥

अथाधिकारप्राप्तिप्रश्नः

ध्वजे गजे स्थिरप्राप्तिः वृषे सिंहे च शीघ्रता ।
कलहन्तु खरे श्वाने नास्तीति ध्वाङ्क्षधूम्रके ॥ २८ ॥

अथ ग्रामप्राप्तिप्रश्नः

ध्वजे गजे वृषे चैव धूम्रे नास्तीति निश्चितम् ।
शुनि सिंहे खरे ध्वाङ्क्षे ग्रामप्राप्तिं विनिर्दिशेत् ॥ २९ ॥

अथ कार्यसिद्धिप्रश्नः

ध्वजे गजे स्थिरं कार्यं त्वरितं वृषसिंहयोः ।

दीर्घकालं श्वखरयोः ध्वाङ्क्षे धूम्रे न सिद्ध्यति ॥ ३० ॥

अथ बन्दिमोचनप्रश्नः

शुनि धूम्रे खरे ध्वाङ्क्षे वन्दी शीघ्रं प्रमुच्यते ।
वृषे गजे ध्वजे सिंहे बन्दिनः कष्टमादिशेत् ॥ ३१ ॥

अथ कालनिर्णयः

ध्वजे सप्तदिनं प्रोक्तं सिंहे पक्षं तथैव च ।
वृषे मासश्च विज्ञेयं गजे मासत्रयं तथा ॥
शुनि खरे सप्तमासं धूम्रे ध्वाङ्क्षे च वर्षकम् ॥ ३२ ॥

इति ध्वजादिप्रश्नगणना समाप्ता ।

समाप्तश्चायं ग्रन्थः ।

मुद्रकः—विद्याविलास प्रेस, वाराणसी, सं० २०१९

ज्योतिष-ग्रन्थाः—

१ **ग्रहलाघवम्** । विश्वनाथी संस्कृत टीका तथा 'माधुरी' हिन्दी टीका ३-५०
२ **पञ्चाङ्गविज्ञानम्** । हिन्दी टीका सहित ०-५०
३ **प्रश्नभूषणम्** । 'विमला' संस्कृत-हिन्दी टीका ०-७५
४ **मानसागरी** । 'सुबोधिनी' हिन्दी व्याख्या सहित ८-००
५ **जन्मपत्रदीपकः** । सोदाहरण सटिप्पण हिन्दी टीका १-२५
६ **जातकपारिजातः** । सुधाशालिनी-विमला संस्कृत-हिन्दी टीका १२-००
७ **जातकाभरणम्** । सपरिशिष्ट 'विमला' हिन्दी टीका सहित ४-००
८ **जातकालङ्कारः**—हरभानुदत्तकृत संस्कृत तथा भावबोधिनी हिन्दी टीका १-००
९ **जैमिनीयसूत्रम्** । सोदाहरण 'विमला' संस्कृत हिन्दी टीकाद्वयोपेत २-००
१० **ताजिकनीलकण्ठी** । गंगाधरमिश्रकृत 'जलदगर्जना' सं. हि. टीका ४-५०
११ **दैवज्ञकामधेनुः** । म० म० पं० अनवमर्शीसंघराजवर सङ्कलित ६-००
१२ **बीजगणितम्** । जीवनाथी संस्कृत तथा 'विमला' हिन्दी टीकायुत ८-००
१३ **बृहज्ज्योतिषसारः** । हिन्दी भाष्य, विवरण व्याख्या सहित ४-५०
१४ **बृहज्जातकम्** । सोदाहरणोपपत्ति 'विमला' हिन्दी टीका सहित ३-५०
१५ **बृहत्संहिता** । सोदाहरण 'विमला' हिन्दी टीका सहित ९-००
१६ **मुहूर्त्तमार्तण्डः** । 'मार्तण्डप्रकाशिका' संस्कृत हिन्दी टीका सहित ३-००
१७ **मुहूर्तचिन्तामणिः** । सटिप्पण 'पीयूषधारा' व्याख्या सहित ५-००
१८ **मुहूर्तचिन्तामणिः** । पीयूषधारानुसारी हिन्दी व्याख्या सहित ३-००
१९ **रमलनवरत्नम्** । 'विमला' हिन्दी टीका सहित २-००
२० **लघुपाराशरी-मध्यपाराशरी** । सोदाहरण-'सुबोधिनी' सं० हि० टीका १-२५
२१ **लीलावती** । सोदाहरण सोपपत्तिक 'तत्त्वप्रकाशिका' संस्कृत-हिन्दी व्याख्या, अभ्यासार्थ प्रश्नपत्रादि सहित ४-००
२२ **शिशुबोधः** । विमला भा. टी. ०-६२ २३ **योगिनीजातकः** । 'विमला' टी. ०-३१
२४ **शीघ्रबोधः** । अनूपमिश्रकृत 'सरला' हिन्दी टीका सहित १-००
२५ **षट्पंचाशिका** । विभा संस्कृत-हिन्दी टीका सहित ०-६५
२६ **वास्तुरत्नावली** । सोदाहरण 'सुबोधिनी' संस्कृत-हिन्दी व्याख्या २-५०
२७ **वास्तुरत्नाकर** । अहिबलचक्रसहित ३-००

प्राप्तिस्थानम्—**चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१**

12829